Similar to the work described under D. No. 2876.

Complete.

Beginning :

लक्ष्मीलक्ष्मीशपादाभ्यामियमस्तु नमस्कृतिः ।
यया निखिलभव्यानि भवेयुर्भजतां हरिम् ॥
श्रुतिस्मृत्युदितं कृत्यं यदाराधनसाधनम् ।
तद्विधायकमन्त्राणां वृत्तिं वक्ष्ये यथाक्रमम् ॥
यावन्तोऽस्यां विकर्मस्थाः पृथिव्यां बालिशाद्विजाः ।
तेषां पावित्र्यसिद्ध्यर्थं सन्ध्या सृष्टा स्वयम्भुवा ॥
उपास्तिस्सन्धौ सूर्यस्य निशाया दिवसस्य च ।
तामेवसन्ध्यां तस्मात्तु प्रवदन्तिमहर्षयइति ॥
अनेनसूर्यान्तर्गतभगवद्ध्यानमेव सन्ध्येत्युक्तं भवति ॥

End :

दामोदरनामार्थः

ददातीतिदाः, सत्पात्रदानशीलाः सज्जनाः तेषामामोदं मोक्षाख्यसुखं दाति ददातीति वा । दमः प्रलयकालः, तत्सम्बन्धि, दामं, दामंचतत् उदं च दामोदं, दामोदेरमत इति वा दामोदरः । पुरुषोत्तमनामार्थः, पुराणिषट्, श्वेतद्वीपानन्तासनवैकुण्ठ सर्वहृदयसत्यलोका व्याकृताकाशाः षट् यस्यासौ, परुषश्चासावुत्तमश्चेतिवा ॥

The Scribe adds ;

पार्थिवसंवत्सर श्रावणकृष्णतृतीयायां लेखनं संपूर्णम्.

R. No. **5958**

Paper. 7¾ × 4 inches. Foll. 3. Lines, 8 in a page. Devanāgarī. Injured. Extent 25 Granthas.

Purchased in 1936–37 from P. Veṅkaṭaramaṇāchāryar, Triplicane, Madras.

कृष्णाष्टकम् by **वादिराजः**

KṚṢṆĀṢṬAKAM by Vādirāja.

Similar to the work described under R. No. 324 (*k*).

Complete.

Beginning :

मध्वमानसपद्मभानुसमं स्मरप्रतिसंस्मर
स्निग्धनिर्मलशीतकान्तिलसन्मुखं करुणोन्मुखम् ।
हृद्यकम्बुसमानकन्धरमक्षयं दुरितक्षयं
स्निग्धसंस्तुतरौप्यपीठकृतालयंहि रमालयम् ॥

End :

रौप्यपीटकृतालयस्य हरेः प्रियं दुरिताप्रियं
तत्पदार्चकवादिराजयतीरितं गुणपूरितम् ।
गोप्यमष्टकमेतदुच्च मुदे ममास्त्विहनिर्मल
. . . . शुद्धफलाय तत्रसुकोमलं हृतधर्मिलम् ॥

Colophon :

इति श्रीवादिराजकृतकृष्णाष्टकं संपूर्णम्.

R. No **5959**

Paper. 9 × 4½ inches. Foll. 5. Lines, 10 on a page. Devanāgarī. Injured. Extent, 40 Granthas.

Purchased in 1936–37 from P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

मुण्डकोपनिषत्

MUṆḌAKOPANIṢAD.

Same work as that described under D. No. 713.

Complete.

R. No. **5960**

Paper. 5½ × 3½ inches. Foll. 55. Lines, 9 on a page. Devanāgarī. Injured. Extent, 400 Granthas.

Purchased in 1936–37 from P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

मध्वविजयः by नारायणपण्डिताचार्यः

MADHVAVIJAYAḤ by Nārāyaṇapaṇḍitācārya.

Same work as that described under R. No. 479.

Contains 15 Sargas complete and 16th Sarga incomplete.

R. No. **5961**

Paper. 8 × 4 inches. Foll. 46. Lines, 11 on a page. Devanāgarī. Injured. Extent, 800 Granthas.

Purchased in 1936–37, from P. Veṅkaṭaramaṇācāryar, Triplicane Madras.

तत्त्वसारसंग्रहः by श्रीनिवासः

TATTVASĀRASAṄGRAHAḤ by Śrīnivāsa.

A work giving in brief the fundamental principles of the Dvaita school of Vedānta.

Complete.

Beginning :

लक्ष्मीपतिं हयग्रीवं नरसिंहं गुणार्णवम् ।
. . . . व्यास . . . णादिकांनुमः ॥
॰ानन्दतीर्थगुरुराजमीडे श्रीमज्जयार्येयतिराजम् ।
तद्वंशजातं परहंसराजं श्रीसत्यनाथेन्द्रमहं नमामि ॥
यस्सत्यनाथेन्द्रपदाम्बुजस्य संसेवयावाप्तसमस्तभाग्यः ।
तत्संस्मृतिध्यानपरायणं तं नतोऽस्मि सत्याभिनवीनतीर्थम् ॥
प्रायेणाल्पायुषो मर्त्याः कलावस्मिन्युगेजनाः ।
. . . . मन्दमतयो मन्दभाग्याह्युपद्रिताः ॥
भूरीणि भूरिकर्माणि श्रोतव्यानि विभागश ।
सन्ति तस्मात्संग्रहेण क्रियते ध्यानसंग्रहः ॥

End :

भगवद्ज्ञान भोगाभ्यां निवृत्तसमस्तानिष्टकर्माणः . . . . सोचितेनार्चिरादिनावा पथा वैकुण्ठलोकवासिनं भगवन्तं, हिरण्यगर्भेणसह प्राप्ताभिन्नलिङ्गशरीराः विध्वस्तप्रकृतयोऽत्यन्तानिवृत्तानिष्टाः सम्यगाविर्भूता-नन्दादिगुणाः भगवत्समीप एवमुपासिना न कदाचित्पुनरावर्ततइति मोक्ष-स्वरूपम् ॥

श्रीनिवासाख्यविदुषा रचितस्तत्त्वसंग्रहः ।
मध्वादिसद्गुरूणां च प्रीत्यै भवतु सर्वदा ॥

Colophon :

इति श्रीतत्त्वसारसंग्रहस्समाप्तः ॥

R. No. **5962**

Paper. 9 × 4½ inches. Foll. 109. Lines, 11 on a page. Devanāgarī. Slightly injured. Extent, 2,000 Granthas.

Purchased in 1936-37 from P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

बृन्दावनाख्यानम्

BṚNDĀVANĀKHYĀNAM.

Similar to the work described under D. No. 2480.

Complete.

Beginning :

हयग्रीवं चिदानन्दविग्रहं सदनुग्रहम् ।
दशग्रीवच्छिदं शापान्मणिग्रीवविमोचनम् ॥
सुग्रीवाभयदं सम्यगुग्रसेनविभूतिदम् ।
उग्रविग्रहहन्तारं भक्ताभयकरग्रहम् ॥
स्वनामग्रहणादेव निरस्तग्रहविग्रहम् ।
बृन्दावनगतं वन्दे ब्रह्मरुद्रेन्द्रवन्दितम् ॥

* * * *

वनं तु पद्मकं नाम सोमनन्दीवनं तथा ।
ब्रह्मारण्यमिति ख्यातं यद्वनं वर्तते भुवि ॥
आनन्दकाननं चेति यद्वनं वर्तते सदा ।
एतान्यन्यानि पुण्यानि वर्तन्ते भुवि कानिचित् ॥
तानि सर्वाणि वर्तन्ते मम बृन्दावने द्विज ।
तस्माद्बृन्दावनमिदं सर्वाभीष्टप्रदं सताम् ॥

End :

उपलक्षणमेतच्चाप्युपलक्षितमेव च ।
अनेनचोपलक्षस्त्वद्युपलस्थलगां कृतिम् ॥
यथा दधि च काकेभ्यो रक्ष्यतामिति वाक्यतः ।
दध्युपघातुका ग्राह्या ह्याखुभुगादयस्तथा ॥
तस्मान्मत्तपसावापि स्वस्य विश्वासतोपि वा ।
भविष्यति सुषेणाद्य मत्कार्यं शोषितं त्रयम् ॥

इदं बृन्दावनाख्यानं ये पठन्ति मनीषिणः ।
मुकुन्दवनमेवास्तु तेषां कन्दाशनाज्ञया ॥

एतत्सर्वस्वाप्नपद्येन गर्वं हित्वासर्वेविप्रवर्यास्यनेन ॥ ?

श्रुत्वाचोर्व्यां शर्वगुर्वादिदेवान् दृष्ट्वोर्वसीं यान्तु मां मानवेन्द्राः ॥

Colophon :

इति स्वाप्नबृन्दावनाख्याने चरमप्राणावधौ पञ्चमोऽध्यायः ॥
श्रीवायुहनूमद्भीममध्वान्तर्गतश्रीमाधवरामकृष्णवेदव्यासात्मकश्रीहयग्रीवात्मक
श्रीरुक्मिणीसत्यासमेतश्रीगोपालकृष्णः प्रीयताम् ॥

R. No 5963

Paper. 8½ × 4¼ inches. Foll. 5. Lines, 8 on a page. Devanāgarī. Injured. Extent, 70 Granthas.

Purchased in 1936–37 from P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

दृश्यत्वविचारः

DṚŚYATVAVICĀRAḤ.

This work contains a series of arguments advanced by the Advaitins to prove that the world we see is only an illusion and these arguments are answered in the light of the Viśiṣṭādvaita school of Vedānta.

Complete.

Beginning :

श्रीश्रीनिवासपरकालयतीश्वराणां
विद्वद्वरिष्ठ(क)कुलिते खलु सन्निधाने ।
योऽभूत्प्रसङ्गवशतो विषयस्सएष
स्संलिख्यते क्रमवशेन कुतूहलेन ॥

तत्रेयं वादिनः प्रथमकक्षा । "विश्वं मिथ्या दृश्यत्वा" दित्यनुमाने हेतुभूतं दृश्यत्वं स्वसमानसत्ताकज्ञानविषयत्वम् दृशिस्वसमानसत्ताकत्व- निवेशाद्ब्रह्मणि नव्याभिचारः । स्वसमानसत्ताकत्वं च स्वानाशकज्ञाना- नाश्यत्वम् । तेनसत्तात्रैविद्ध्यसिद्धेर्मिथ्यात्वसिद्ध्यनन्तरभावित्वेपि नान्योन्- याश्रयः ॥

तत्र वादिनस्त्रयोदशीकक्षा । . . . . . क्तापत्तिरिष्टत्वादन्यत्र तादृश-नियमो नस्वीक्रियत इति । तत्र त्रयोदशीकक्षां स्वामिनस्सभासद श्शास्त्रार्थसारग्रहणकुशलां नानुमेनिरे ॥

R. No. 5964

Paper. 10 × 5 inches. Foll. 8. Lines, 12 on a page. Devanāgarī. Injured. Extent, 200 Granthas.

Purchased in 1936–37 from P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

ब्रह्मसूत्राधिकरणार्थरत्नमाला

BRAHMASŪTRĀDHIKARAṆĀRTHARATNAMĀLĀ.

Similar to the work described under D. No. 4818.

Complete

Beginning :

ज्ञानार्थमर्थितः श्रीशो ब्रह्मरुद्रादिभिस्सुरैः ।
व्यासो भूत्वा समुत्पन्नान् व्यञ्जयन् व्यभजच्छ्रुतीः । :
तदर्थसन्निर्णयाय शास्त्रं शारीरकाह्वयम् ।
चक्रे चतुर्लक्षणेतं कलाचरणसंयुतम् ॥
शतद्वयेन विंशत्या द्वाभ्यामपि समन्वितम् ।
नयानां भूषणैस्सूत्रै स्संयुतं भगवान् प्रभुः ॥

End :

अवदन् भगवान्व्यासः श्रीशस्सज्ञानसिद्धये ।
तद्वाक्यपद्मसौरभ्यं व्यञ्जयन्मध्वमारुतः ॥
तापानपाहरत्स्वानां कृपापूरसुशीतलः ।
तुर्याध्यायतुरीयाङ्घ्रौ नया एकादशोदिताः ॥
एवं षोडशपादेषु मिलित्वा खररानयाः ॥

Colophon :

इति श्रीमद्ब्रह्मसुत्राधिकरणार्थरत्नमालायां चतुर्थेध्यायः ॥

R. No. 5965

Paper. 8½ × 5½ inches. Foll. 10. Lines, 19 on a page. Devanāgarī. Injured. Extent, 200 Granthas.

Purchased in 1936–37 from P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

अणुभाष्यव्याख्यानम् ।

ANUBHĀṢYA VYĀKHYĀNAM.

This is a commentary on the Brahmasūtrāṇubhāṣya of Ānandatīrtha.

Complete.

Beginning :

इन्दिरापतिमानम्य पूर्णबोधादिकान् गुरून् ।
ब्रह्मसूत्राणुभाष्यस्य करिष्याम्यर्थसंग्रहम् ॥

अधिकारिणां ब्रह्मज्ञानसिद्ध्यर्थं वेदाः प्रवृत्ताः । तन्निर्णयाय व्यासो ब्रह्मसूत्राणि चकार । पूर्णप्रज्ञस्तेषामणुभाष्यं कर्तुं तद्गुणविशिष्टं हरिं नत्वा चिकीर्षितं प्रतिजानीते—नारायणमिति ।

End :

एवं समापितभाष्यो भगवानाचार्य शिष्यशिक्षणायान्तेपि सदास्वान्तदृष्टं हरिं संबोध्य क्रियासमभिव्याहारेण स्वकृतग्रन्थोक्तगुणकं प्रणमति—नमोनम इति । हे विरिञ्च शार्वकेरीड्य स्तुत्य अशेषदोषेभ्यो दूर हे नारायण पूर्णगुणस्वरूपदेहाय श्रीवराहाय लक्ष्मीपतये तुभ्यं नम इत्यन्वयार्थः

Colophon :

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्यव्याख्याने चतुर्थोध्यायः ।

R. No. **5966**

Paper. 11¾ × 4 inches. Foll. 5. Lines. 5 on a page. Devanāgarī. Injured.

Purchased in 1936–37 from P. Veṅkaṭaramaṇāchāryar, Triplicane, Madras.

(*a*) तत्त्वसंख्यानम् by आनन्दतीर्थः

TATTVASAṄKHYĀNAM by Ānandatīrtha.

Foll. 1*a*—3*b*. Extent, 25 Granthas.
Same work as that described under D. No. 4788.
Incomplete.

(*b*) तत्त्वविवेकः by आनन्दतीर्थः

TATTVAVIVEKAḤ by Ānandatīrtha.

Foll. 4*a*—5*a*. Extent, 10 Granthas.
Same work as that described under D. No. 4785.
Incomplete.

R. No. **5967**

Paper. 9 × 4½ inches. Foll. 8. Lines, 12 on a page. Devanāgarī. Injured.

Purchased in 1936–37 from P. Veṅkaṭaramaṇāchāryar, Triplicane, Madras.

(*a*) माण्डुक्योपनिषत्.

MĀṆḌŪKYOPANIṢAD.

Foll. 1*a*—2*b*. Extent, 40 Granthas.
Same work as that described under D. No. 694.
Complete.

(*b*) माण्डुक्योपनिषद्भाष्यं by आनन्दतीर्थः

MĀṆḌŪKYOPANIṢADBHĀṢYAM by Ānandatīrtha.

Foll. 3*a*—8*a*. Extent, 120 Granthas.
Same work as that described under .D. No. 708.
Complete.

R. No. **5968**

Paper. 9½ × 4½ inches. Foll. 12. Lines, 8 on a page. Devanāgarī. Injured. Extent 150 Granthas.

Purchased in 1936–37 from P. Veṅkaṭaramaṇāchāryar, Triplicane, Madras.

तलवकारखण्डार्थः

TALAVAKĀRAKHAṆḌĀRTHAḤ.

This work gives in brief the idea contained in the Talavakāropaniṣat.
Complete.

Beginning :

अथ तलवकारखण्डार्थ आरम्यते ।
अनन्तगुणपूर्णाय दोषदूराय विष्णवे ।
नमः श्रीप्राणनाथाय भक्तेभ्योऽभीष्टदायिने ॥

अस्या उपनिषदो विरिञ्च्यात्रिसंवादरूपत्वात्तावत्र ऋषी ज्ञेयौ । देवतातु ब्रह्मशब्देन विष्णुः, छन्दस्त्वक्षरगणनया तृष्टुबादि यथायोगं ध्येयम् । जानन्नप्युमापतिर्विशेषज्ञानार्थंवा ज्ञातस्य दाढयार्थंवा लोकानुग्रहार्थंवा सर्वेन्द्रियप्रेरकं पृच्छति ब्रह्माणम् । इषितामिष्ठं साध्व साधुवाप्रति केनदेवेन प्रेषितं सत् पतति ॥

End :

कीदृशं मन इत्यत उक्तं, अभीक्ष्णं सङ्कल्पकालगुणापरिच्छिन्ने स्वर्गे स्वरूपभूतसुखज्ञानात्मके प्रकाशरूपे जये श्रेष्ठे ब्रह्मणीतियोज्यम्, प्रतिष्ठति । द्विरुक्तिस्सर्वावधारणार्थम् ।

समस्तगुणपूर्णाय दोषदूराय विष्णवे ।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ॥

R. No. **5969**

Paper. 9 × 4½ inches. Foll. 8. Lines, 10 on a page. Devanāgarī. Injured. Extent, 130 Granthas.

Purchased in 1936–37 from P. Veṅkaṭaramaṇāchāryar, Triplicane, Madras.

तलवकारोपनिषद्भाष्यम—सटीकम्

TALAVAKĀROPANIṢABHĀṢYAM with commentary.

Text by Ānandatīrtha.
Commentary by Vyāsatīrtha.
Same text as that described under D. No. 393.
Complete.

Beginning :

जडाजडात्मकं विश्वं कृत्वाधिष्ठाय संहरन् ।
स्वभावात्क्रीडते यस्तं वन्दे मध्ववल्लभम् ॥

योऽसुरानजयद्देवो हृदयस्थस्तदर्थतः ।
ददौचाभीष्टमिष्टेभ्यस्तं वन्दे मध्ववल्लभम् ॥

तलवकारोपनिषदं यथावद्व्याचिख्यासुर्भगवानानन्दतीर्थमुनिस्तदुक्तगुणै-रुपश्लोकयन्नारायणं प्रणमति ।

अनन्तेति—

End :

मङ्गलावसानस्थशास्त्रस्य प्रचयादिभावात् भाष्यं समाप्यान्तेपि स्तुति-नमनरूपं मङ्गलाचरणमाचरति ' ये इति

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिततलवकारभाष्यटीका जयतीर्थ पूज्यचरणशिष्यव्यासतीर्थविरचिता समाप्ता ॥

R. No. **5970**

Paper. 10¾ × 5 inches. Foll. 131. Lines, 10 on a page. Nandināgarī. Injured Extent, 2,600 Granthas.

Purchased in 1936–37 from P. Veṅkaṭaramaṇāchāryar, Triplicane, Madras.

प्रमेयदीपिकाटिप्पणी by श्रीनिवासः

PRAMEYADĪPIKĀṬIPPAṆĪ by Śrīnivāsa.

This is a commentary, by Śrīnivāsa, on the Prameyadīpikā, the commentary on the Bhagavadgitābhāṣya of Ānandatīrtha by Jayatīrtha.

Contains first 4 Adhyāyās complete and 5th Adhyāya incomplete.

Beginning :

नमामि तर्काभयचक्रशङ्खपाणी सदा मध्वकरातिपूज्यौ ।
श्रीव्यासकृष्णौ परिपूर्ण बोधांस्तथा जयार्या नितरान्गुरूंश्च ॥
वेदेशयोगिनंवन्दे यादवार्यगुरोर्गुरुम् ।
छान्दोग्यभाष्यटीकायाः कर्तारमहमादरात् ॥
अध्यात्मदर्शने रक्तान् छायानुग्रयोः पटून् ।
कृष्णनाम्नः पितन् वन्दे कृष्णपादाब्जदर्शनान् ॥
श्रीमन्न्यायसुधाया यैर्भाव स्सम्यक् प्रकाशितः ।
तान्वन्दे यादवाचार्यान् सदाविद्यागुरूनमम ॥
अथतत्कृपया श्रीनिवासाख्यायुतसूरिणा ।
गीताभाष्यस्य टीकायाः क्रियते भावदीपिका ॥
बुधैरपि सुदुर्बोधे ग्रन्थे यन्मम साहसम् ।
तत्पारयन्तु निपुणा गुरुपादरजः कणाः ॥

अथ सर्वज्ञकल्पाष्टीकाकार जयतीर्थश्रीमच्चरणाः श्रीमद्भगवद्गीता भाष्यं यथावद्व्याख्यातुकामाः विघ्नविघातादिप्रयोजनं स्वेष्टदेवताया लक्ष्मीपतेस्तथामूलगुरोरादिगुरोः परमगुरोः स्वगुरोश्च वन्दनरूपं मङ्गलं कृत्वा शिष्यशिक्षायै ग्रन्थादावुपनिबध्नाति— गुणगणनिलयमिति ।

End :

पुनरुक्तिरिति—सब्रह्मयोगमुक्तात्मेत्यर्थः । स्तुतिरिति—स्तुतौवाधिकोक्तिरिति भावः । व्यवहितत्वादिति- क्त्वाबाहिः पदाभ्यामित्यर्थः । प्रत्याहारेण विषयोक्त्या इति शेषः । पद्विति ॥

R. No. 5971

Paper. 10½ × 4½ inches. Foll. 30. Lines, 9 on a page. Devanāgarī. Good. Extent, 1080 Granthas.

Purchased in 1936–37 from P. Veṅkaṭaramaṇāchāryar, Triplicane, Madras.

गयामाहात्म्यम्

GAYĀMĀHĀTMYAM.

Same work as that described under R. No. 2096 with a different beginning.

Complete in 1 to 8 adhyāyas.

R. No. 5972

Paper. 10½ × 3½ inches. Foll. 19. Lines, 7 on a page. Devanāgarī. Injured.

Purchased in 1936–37 from P. Veṅkaṭaramaṇāchāryar, Triplicane, Madras.

वासिष्ठरामायणम्

VĀSIṢṬHARĀMĀYAṆAM.

Extent, 400 Granthas.

Same work as that described under R. No. 647 (*b*).

Contains 11 to 15 adhyāyas.

R. No. 5973

Paper. 9¼ × 4¼ inches. Foll. 26. Lines, 8 on a page. Devanāgarī. Injured.

Purchased in 1936–37 from P. Veṅkaṭaramaṇāchāryar, Triplicane, Madras.

वासिष्ठरामायणम्

VĀSIṢṬHARĀMĀYANAM.

Extent, 400 Granthas.

Same work as that described under R. No. 647 (*b*).

Contains 11 to 15 adhyāyas.

R. No. 5974

Paper. 8 × 4 inches. Foll. 16. Lines, 11 on a page. Devanāgarī. Injured.

Purchased in 1936–37 from P. Venkataramanacharyar, Triplicane, Madras.

यमकभारतटीका

YAMAKABHĀRATAṬĪKĀ.

Extent, 250 Granthas.

Same work as that described under D. No. 11890.

Contains 39 stanz as only.

R. Ro. 5975

Paper. 11 × 4¼ inches. Foll. 12. Lines, 10 on a page. Devanāgarī. Injured.

Extent, 180 Granthas.

Purchased in 1936–37 from P. Veṅkaṭaramaṇācharyar, Triplicane, Madras.

प्रमाणचन्द्रिका

PRAMĀṆACANDRIKĀ.

A work dealing with epistemology in the light of Dvaitaschool of Vedanta. The work breaks in the portion of inference.

Incomplete.

Beginning :

लक्ष्मीपतेः पदाम्भोजयुगंनत्वा गुरोरपि ।
प्रमाणचन्द्रिकां कुर्मो बालानां बोधसिद्धये ॥

इहखलु सुखमेव मे स्याद्दुःखं मनागपि माभूदिति निखिलापेक्षित मोक्षस्य भगवत्तदन्यस्वातन्त्र्यास्वातन्त्र्यज्ञानसाध्यत्वान्मुमुक्षूणां परतन्त्रमिदं स्वतन्त्रभगवदायत्ततया अवश्यं वेदितव्यम् ॥

End :

ज्ञातव्याप्तिकस्य कुतः कदाचिदग्निप्रमानुपपत्तिः । व्याप्तिस्मरणाभावात् । तथाच व्याप्तिस्मरणसहितं सम्यग्ज्ञातालिङ्गं समुचितदेशादावाग्नि प्रमां जनयदनुमानमित्युक्तं भवति ॥

R. No. 5976

Paper. 9½ × 4½ inches. Foll. 16. Lines, 13 on a page. Devanāgarī. Injured.

Extent, 385 Granthas.

Purchased in 1936–37 from P. Veṅkaṭaramaṇācharyar, Triplicane, Madras.

तत्त्वचिन्तामणिव्याख्या—सिंहव्याघ्री

TATTVACINTĀMAṆIVYĀKHYĀ—SIHMAVYĀGHRĪ.

Similar to the work described under D. No. 4073.

Contains pañcalakṣaṇī only.

Beginning :

साध्यसामानाधिकरण्यानधिकरणत्वलक्षणे यदितराधिकरणावृत्तित्वरूपा सामानाधिकरण्यं निवेश्यते, तदा द्रव्यं सत्त्वादित्यादावतिव्याप्तिः ; सत्ताया-द्रव्यत्वाधिकरणवृत्तितया तादृशसामानाधिकरण्यानधिकरणत्वात् ॥

End :

स्वनिष्ठहेतुतावच्छेदसम्बन्धावच्छिन्नवृत्त्यनवच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यसामानाधिकरण्याभावकत्वम् , विवक्षणीयमित्यादयः परिष्कारस्य पन्थानो द्रष्टव्याः ॥

Colophon :

सिद्धव्याप्तिस्समाप्ता ॥

R. No. **5977**

Palm leaf. 12¼ × 1½ inches. Foll. 28. Lines, 8 in a page. Nandināgarī. Injured.

Purchased in 1936–37 from P. Veṅkaṭaramanācharyar, Triplicane, Madras.

(*a*) सत्तत्त्वरत्नमालिका by आनन्दतीर्थः

SATTATTVARATNAMĀLIKĀ by Ānandatīrtha.

Fall. 1 a-24 b. Extent, 380 Granthas.
Same work as that described under D. No. 4844.
Complete.

(*b*) भळित्थेत्यादिसूक्तार्थः

BHAḶITTHETYĀDISŪKTĀRTHAḤ.

Foll. 25*a*—28*b*. Extent, 50 Granthas.

This contains an explanation of the sūkta Bhaḷittha as refering to Vādirāja.

Incomplete.

Beginning :

भळित्थेत्यादिसूक्तस्य श्रीमल्लातव्याचार्यावतारभूतश्रीमद्वादिराज भगवत्पादनयार्थमाह । तथाहि ।

सहोरूपस्य देवस्य लातव्यस्य बलात्मकम् ।
मूलरूपं ज्ञाननतं जगद्गरणजं यतः ॥
जातं तेनात्मकं सर्ववेष्टकेन महात्मना ।
रूपत्रयावताराय निहितं हरिणा स्वयम् ॥

End :

जगद्द्वयं तु सृष्ट्वादौ भगवान्पुरुषोत्तमः ।
स्वोदरे संस्थितान्मिश्रान्स्थापयित्वा प्रभुः स्वयम् ॥
" ततस्सृष्टिं चकारासौ भगवान्पुरुषोत्तमः "
इति प्रमाणसंग्रहे ॥

R. No. **5978**

Palm leaf. 16 × 1 inches. Foll. 39. Lines, 4 on a page. Nandināgarī. Injured.

Purchased in 1936–37 from P. Veṅkaṭaramanāchayar, Triplicane, Madras.

पिनाकिनीमाहात्म्यम्

PINĀKINĪMĀHĀTMYAM.

Foll. 1*a*—39*a*. Extent, 315 Granthas.

Same work as that described under D. No. 2466.

Complete.

R. No. **5979**

Palm leaf. 16 × 1¼ inches. Foll. 142. Lines, 6 on a page. Nandināgarī. Injured.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramanāchariyar, Triplicane, Madras.

(*a*) काण्वोपनिषदर्थसंग्रहः by राघवेन्द्रयतिः

KĀṆVOPANIṢADARTHASAṄGRAHAḤ by Rāghavendrayati.

Foll. 1*a*—125*a*. Extent, 2,000 Granthas.

This work gives in brief the idea contained in the Kāṇvopaniṣat.

Complete.

Beginning :

प्रणम्य श्रीमदानन्दतीर्थादिगुरुरीश्वरान् ।
काण्वोपनिषदोऽर्थानां संग्रहः क्रियते मया ॥

अस्या उपनिषदो ब्रह्मसूर्ययाज्ञवल्क्याकाण्वाः क्रमादृषयः । लक्ष्मीशो देवता । वाक्यरूपत्वान्नछन्दोऽन्वेषणम् । अस्या उपनिषदोऽध्यायाष्टकात्मकत्वेपि पूर्वाध्यायद्वयस्य विद्याधिकारार्थ मश्वमेधकर्मनिरूपण-परत्वेन तद्व्याख्याय कर्मणा शुद्धान्तःकरणस्य ब्रह्मस्वरूपं निरुपयितुं

प्रवृत्तं तृतीयाध्यायादिग्रन्थसन्दर्भं व्याचख्यौ भगवान्भाष्यकारः । तथाहि-आदौ पूर्वप्रकृताश्वमेधयागीयाश्वनिष्ठां ब्रह्मविद्यामाह—उषावा इत्यादिना.

End :

अध्यायद्वयोक्तविद्याप्रवर्तकपरम्परां प्रस्तावपूर्वकमाह—अथवंश इत्यादिना । अत्रपञ्चम्यन्तादुपदेष्टारः, प्रथमान्तादुपदेश्या ज्ञेयाः । . . . . इत्यष्टमोऽध्यायः

Colophon :

इति श्रीकाण्वोपनिषद्भो भाष्याद्युक्तार्थसंग्रहः ।
श्रीराघवेन्द्रयतिना कृतस्सज्जनसंविदे ॥

(b) छान्दोग्योपनिषद्व्याख्या.
CHĀNDOGYOPANIṢADVYĀKHYĀ.

Foll. 126*a*—140*b*. Extent, 250 Granthas.
Similar to the work described under R. No. 77.
Contains sixth Adhyāya only.

Beginning :

श्वेतकेतुर्नामतः, आरुणेयो अरुणस्य पौत्रः, अरुणाया पुत्र इतिवा आसह । तंह पिता गुरुरुद्दालक उवाचहकिल । किमिति । हेश्वेतकेतो वस ब्रह्मचर्यं, वेदाध्ययनार्थं गुरुकुलवासं कुर्वित्यर्थः

End :

भूतानि सर्वभूतान्तर्गतानि भगवद्रूपाणि पूर्णानि वा सम्यक्पश्यतः परोक्षीकुर्वतो मार्गपदज्ञानात् भगवत्स्वरूपज्ञानात् पदैषिणः स्वपदप्रतीच्छवो देवाअपि मुह्यन्ति । देवैरप्याकां . . . . इति श्रुतिरियम् । द्विर्वचनमध्यायस्य सर्वस्यापि प्रामाणिकत्वसूचनार्थम्

Colophon :

इति श्रीमच्छान्दोग्योपनिषद्व्याख्याने षष्ठोऽध्यायः ।

R. No. 5980

Palm leaf. 15¼ × 1¼ inches. Fol. 190. Lines, 7 on a page. Nandināgarī. Injured. Extent, 5,320 Granthas.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācāriar, Triplicane, Madras.

ब्रह्मसूत्रभाष्यटीका—तत्त्वप्रदीपिका by त्रिविक्रम
BRAHMASŪTRABHĀṢYAṬĪKĀ—TATTVAPRADĪPIKĀ by Trivikrama.

Similar to the work described under D. No. 4813.
Complete.

Beginning :

पूर्णज्ञानं विपुलपरमानन्दसन्दोहदेहं
भक्तप्रोक्ताकृतविवरणब्रह्मसूत्राव . . . . .
. . न्नारायण पदमहं ध्वस्तनिश्शेषदोषं
वन्दे नित्यं गुरुमपि गुरोरागमार्थप्रकाशम् ॥
यस्याम्नायपदाक्षराणि परमं स्वार्थं लभन्ते गुणान्
संप्रोच्यैव हितानि बलव . . . . तिसासादिभिः ।
तं सेव्यं मुनिभिः प्रशान्तमनसा भक्त्या भवाच्चिन्तये
स्वानन्दप्रद मिन्दिरापतिमहं भूयोऽभिवन्दे हरिम् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य श्रीमद्ब्रह्मसूत्रभाष्यस्य टीकायां त्रिविक्रमार्यकृतौ तत्वप्रदीपिकायां प्रथमाध्यायस्य प्रथमः पादः

End :

नमस्तस्मै नमस्तस्मै समस्तस्वामिनेऽस्तु ते ।
नमस्तस्मै च यस्तस्मै नमस्कर्ता गुरुः सदा ॥

Colophon :

इति श्रीमदानन्दतीथभगवत्पादविरचितस्य श्रीमद्ब्रह्मसूत्रभाष्यस्य टीकायां त्रिविक्रमार्यकृतौ तत्वप्रदीपिकायां चतुर्थाध्यायस्य चतुर्थः । चतुर्थाध्यायः समाप्तः ।

———

R. No 5981

Palm leaf. 17 × 1¼ inches. Foll. 71. Lines, 6 on a page. Nandināgarī. Injured.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācariar, Triplicane, Madras.

(*a*) पदार्थसंग्रहः

PADĀRTHASAṄGRAHAḤ.

Foll. 1—15. Extent, 360 Granthas.

Similar to the work described under D. No. 15717.

Complete.

Beginning :

प्रणम्य रामचन्द्रांघ्रिं दश प्रामितिपूर्वकान् ।
संगृह्यन्ते पदार्थश्च दश प्रामितिवर्त्मना ॥

तत्र प्रामितिविषयाः पदार्थाः । तेऽष्टविधाः । द्रव्यगुणकर्मसामान्य विशेष विशिष्टांस्य (?) भावभेदात् । द्रव्यत्वाद्येव द्रव्यादीनां लक्षणम् ।

End :

पदार्थानां विवेकोऽयं संग्रहेण निरूपितः ।
धयितां हृदये सद्भिः साधवो हि गुणग्रहाः ॥

Colophon :

इति श्रीपदार्थसंग्रहः समाप्तः ।

(b) पदार्थसंग्रहः

PADĀRTHASAṄGRAHAḤ.

Foll. 17—71. Extent, 1,296.

Similar to the work described under D. No. 15717.

Contains the end of Dravyaparicchedа.

Beginning :

जानकी वदनांभोजभानवे गतये सताम् ।
नमः श्रीरामचन्द्राय हेतवे सर्वसंपदाम् ॥

सृष्टिरक्षाहृतिज्ञाननियत्यज्ञानबन्धनात् ।
मोक्षं च विष्णुतश्चैव ज्ञात्वा मुक्तिर्नचान्यथा ॥

End :

तेषां वेदबाह्यत्वात् । द्यावाभू . . . . न् दव एक इत्यादि-श्रुते श्चात्रानुसन्धेया ॥ इति संक्षेपः ।

Colophon :

इति परमात्मविवेकः । इति श्रीपदार्थसंग्रहे द्रव्यपरिच्छेदः समाप्तः ।

R, No. 5982

Palm leaf. 16½ × 1½ inches. Foll. 86. Lines, 9 on a page. Nandināgarī. Injured.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācariar, Triplicane, Madras.

(*a*) मन्त्रार्थमञ्जरी by राघवेन्द्रयतिः

MANTRĀRTHAMAÑJARĪ by Rāghavendrayati.

Foll, 1*a*—84*a*. Extent, 3024 Granthas.

This work gives in brief the summary of the hymns which were explained in the Ṛgbhāṣya of Ānandatīrtha.

Contains the end of 2nd Varga of 8th Sūkta.

Beginning :

अशेषगुणसंपूर्णं सर्वदोषविवर्जितम् ।
अनन्ताम्नायसंवेद्यं वन्देऽहं कमलापतिम् ॥

प्रणम्य श्रीमदानन्दतीर्थादिगुरुशेखरान् ।
संग्रहिष्यामि ऋग्भाष्यप्रोक्तानर्थान् नृचां स्फुटम् ।

* * * *

सहोतेतिश्रुत्या होतृनियामकतया विशिष्य तत्रसान्निध्यात् तदधीनत्वादिति प्रागुक्तन्यायेनैव होतृनामकमृत्विजं होतारमिति कुरुपाण्डवन्यायेनैव समान्यविशेषभावादपुनरुक्तिः ।

Colophon :

इति श्रीमन्त्रार्थमञ्जर्यामाद्यमाग्नेयम् ।

* * * *

इति श्रीमन्त्रार्थमञ्जर्यां राघवेन्द्रयतिकृतायां सप्तमे सूक्ते द्वितीयो वर्गः ।

* * * *

इति मन्त्रार्थसंग्रहे द्वितीयो वर्गः ।

End :

कल्याणगुणपूर्णाय दोषदूराय विष्णवे ।
अनन्ताम्नाय वेद्याय श्रीप्राणपतये नमः ॥

Colophon :

इति श्रीसुधीन्द्रगुरुपादशिष्यराघवेन्द्रयतिकृतायां मन्त्रार्थमञ्जर्यां अष्टमेसूक्ते द्वितीयो वर्गः ॥

(*b*) ऋग्भाष्यटीकाव्याख्या by रामचन्द्रतीर्थः

ṚGBHĀṢYAṬĪKĀVYĀKHYĀ by Rāmacandratīrtha.

Foll. 84*b*—86. Extent, 72 Granthas.

This work is a commentary, by Rāmacandratīrtha, on the Ṛgbhāṣya-ṭīkā.

Incomplete.

Beginning :

कल्याणगुणपूर्णाय कञ्जजादिप्रसूतये ।
श्री मध्वदेशिकेष्टाय श्रीवराहाय ते नमः ॥

अशेषप्राणिनां ने श्रा(त्रा)येनसंपूज्यते हरिः ।
तस्य वायोस्तृतीयं तद्रूपं मध्वाभिधंभजे ॥

मूकोपि वाग्मितां यायात् यदनुग्रहमात्रतः ।
सेवेत जययोगीन्द्रं प्रतिवादिमतच्छिदम् ॥

यस्तत्वं विषलाः सर्वे पीत्वा न्यायामृतं मुदा ।
अमंस त तृणायारिन् व्यासतीर्थं तमाश्रये ॥

अस्त्यतः शास्त्रवासेन रामचन्द्राख्यभिक्षुणा ।
ऋग्भाष्यविवृतेर्व्याख्या क्रियते प्रीतये हरेः ॥

End :

यद्यपि होतृशब्दस्य तृजन्तत्वेपि कर्तरिचेत्यत्र कृद्योगलक्षणाया एव षष्ट्याः समासप्रतिषेधात् । शेषलक्षणषष्ठायाः समासोपपत्तिस्तथाप्यृग शब्दित विश्वनियन्तृविष्णोः स्वभाव एव । नतुप्रयोजनोद्देशेनेति ज्ञापयितुं ताच्छीलिकतृन्नन्ततााश्रितेति ध्येयम् ॥

R. No. 5983

Palm leaf. $9\frac{1}{2} \times 2$ inches. Foll. 76. Lines, 9 on a page. Nandināgarī. Injured.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācāriar, Triplicane Madras.

(*a*) प्रमाणपद्धतिव्याख्या

PRAMĀṆAPADDHATIVYĀKHYĀ.

Foll. 1*a*—31*b*. Extent, 900 Granthas.

Similar to the work described under D. No. 4805.

Incomplete.

पद्मापतिपदांभोजयुग्ममानम्य सद्गुरून् ।
प्रमाणपद्धतेर्भावं वर्णयामि यथामति ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्त्यर्थं कृतं नमस्काररूपं मङ्गलं शिष्यशिक्षायै निबध्नन् चिकीर्षितं प्रतिजानीते । प्रणम्येति ।

End :

एते पदार्था वा तात्पर्यविषयाभिधसंसर्गवन्तः आकांक्षादिवत्पदस्मारितत्वात् इत्येवमनुमानेन वक्तृज्ञा . . . .

b प्रमाणलक्षणटीकाव्याख्या by विजयीन्द्रभिक्षुः

PRAMĀṆALAKṢAṆAṬĪKĀVYĀKHYĀ by Vijayīndrabhikṣu.

Foll. 32—76. Extent, 1,188 Granthas.

This is a commentary, by Vijayīndrabhikṣu, on the Pramāṇalakṣaṇaṭīkā of Jayatīrtha.

Incomplete.

Beginning :

सर्वज्ञं सर्वकर्तारं सर्वजीवजडात्मकम् ।
प्रपञ्चाद्वस्तुतोऽनन्यं भिन्नं नरहरिं भजे ॥

Colophon :

इति श्रीविजयीन्द्रविरचितायां प्रमाणपद्धतिटीकायां द्वितीयंप्रकरणम् ।

End :

न्यूनाधिकभावस्याशक्याज्ञानत्वेन अयोगात् । घटवति घटोपलंभे घटाभावरूपाविशेषणीभावेनैव घटाभावप्रमानुत्पत्तेरुपपत्तेः ॥

* * * *

R. No. 5984

Paper. $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Foll. 47. Lines, 13 on a page. Devanāgarī. Injured.
Extent, 1000 Granthas.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

तत्त्वचिन्तामणिदीधितिप्रकाशिका by गदाधरः

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ by Gadādhara.

Same work as that described under D. No. 4046.

Contains Sāmānyanirukti complete.

R. No. 5985

Paper $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Foll. 8. Lines, 13 on a page. Devanāgarī. Injured. Extent, 200 Granthas.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

तत्त्वचिन्तामणिदीधितिः

TATTVACINTĀMAṆIDĪDHITIḤ.

Same work as that described under D. No. 4012.

Contains caturdaśalakṣaṇī and Pañcalakṣaṇī.

R. No. 5986

Paper. $9 \times 4\frac{1}{2}$ inches. Foll. 4. Lines, 13 on a page. Devanāgarī. Injured. Extent, 100 Granthas.

Purchased in 1936–37 from Śrī P. Venkataramanacāryar, Triplicane, Madras.

तत्त्वचिन्तामणिदीधितिः

TATTVACINTĀMAṆIDĪDHITIḤ.

Same work as that described under D. No. 4006.

Contains Sāmānyanirukti incomplete.

R. No. 5987

Paper. $9 \times 4\frac{1}{2}$ inches. Foll. 123. Lines, 13 on a page. Devanāgarī. Injured. Extent, 2500 Granthas.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

तत्त्वचिन्तामणिदीधितिप्रकाशः by गदाधरः

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚAH by Gadādhara.

Same work as that described under D. No. 4053.

Contains caturdaśalakṣaṇī incomplete.

R. No. 5988

Paper. $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Foll. 7. Lines, 12 on a page. Devanāgarī. Injured. Extent, 140 Granthas.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

गदाधरीयव्याख्या by शङ्करभट्टः

GADĀDHARĪYAVYĀKHYĀ by Śaṅkarabhaṭṭa.

Same work as that described under D. No. 4083.

Incomplete.

R. No. 5989

Paper. 9¼ × 4½ inches. Foll. 9. Lines, 10 on a page. Devanagārī. Injured. Extent, 120 Granthas.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

प्रामाण्यवादः

PRĀMĀṆYAVĀDAḤ.

Similar to the work described under R. No. 113 (*b*).

Wants beginning.

Contains jñaptiprāmāṇyavāda complete.

Beginning :

सिद्धान्तरु . . . . प्रामाण्यस्य स्वतोग्रहेप्यनभ्यासदशापन्नज्ञाने तत्संशयो नस्यात् । ज्ञानग्रहे प्रामाण्यनिश्चयादनिश्चयेवा स्वतो नप्रामाण्यग्रहः । ज्ञानाग्रहे धर्मिज्ञानाभावान्नसंशयः ॥

End :

लिङ्गादिनिश्चयस्य स्वकारणाधीनस्य सर्वसिद्धत्वादितिचेन्न । प्रामाण्य संशयेन लिङ्गस्य सन्देहात् । नहि लिङ्गादिज्ञानेन प्रामाण्यस्य संशयः अनुभवविरोधादिति । उच्यते । अप्रामाण्यशङ्काकलङ्काभावेन लिङ्गादि ज्ञानस्यैवार्थनिश्चायकत्वात् । तत्क . . . . केतूकैवगतिः । यत्तुव्यवसायेक्वचिदप्रामाण्यशङ्का क्वचिद्वर्तत इति ॥

* * * *

तदुक्तम्

नहि पिपासूनां झटिति प्रचुरतरा समर्था च प्रवृत्ति . . . . सीति पिपासोपशमनशक्तिः प्रत्यक्षेति ।

Colophon :

इति ज्ञप्तिप्रामाण्यवादः

R. No. 5990

Paper. 10 × 5½ inches. Foll. 41. Lines, 15 on a page. Telugu. Slightly injured. Extent, 1000 Granthas.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

कल्पलताबन्धः—सव्याख्यः by मुद्दुकविः

KALPALATĀBANDHAḤ with commentary by Muddukavi.

A Kāvya by Maddukavi addressed to a king Mukunda by name. This work contains a commentary. The author of which is not known.

Contains Stabakas 1—3 complete. 58 stanzas in the 4th Stabaka.

Beginning :

(मू) श्रीराजाने यशस्विन् प्रभवतु नृविभो मोददाता मुकुन्द
स्त्वावस्थायासमानो भुवि जय . . . राराशिजारं दुरापः ।
त्वां सेनान्यं महस्विन् ददुदयपरमानन्दवन्दकलार्कं
कुंजेतारं रेम . . . ति विलसन्मानया . . विधेयम् ॥

(व्या) श्रीति । इराभूमि जायायस्येराजानिः जायायानिःश्रीयुतश्चासौ इराजानिश्चेति कर्मधारयसमासः । शाकपार्थिववत् । हे श्रीराजाने भूपते " इराभूवाक्सुराप्सुस्यादित्यमरः ।

* * * *

मुद्दुकविविजयदप्रभुवरविभ्रमवप्रभोविभान्वविभो ।
भोराजासन् मा भारागो भोमोदतागम् ॥

Colophon :

इति कल्पलताबन्धे गजाश्मपुरवासिमुद्दुकविकल्पिते ।
बहुविधवृत्तविचित्रे प्रथमस्तवकोऽस्तु सुमनसां प्रीत्यै ॥

End :

सोमुदिनसन्तुष्टत प्रतापः जयश्शत्रुजयः भगः कीर्तिश्चलसति । त्वं भाज प्रकाशमानो भव ।

* * * *

(व्या) भासाधीना . . . . तुरमण भयोधीशभूतं विधेयं . . .
. . . . भ्यायस्या महात्मा तनुविभवा राह्यावन् किलार्कम्

* * * *

R. No. 5991

Paper. 12 × 4 inches. Foll. 9. Lines 10 on a page. Devanāgarī. Injured. Extent, 160 Granthas.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

गङ्गालहरी—सव्याख्या

GAṄGĀLAHARĪ with commentary.

Same text as that described under R. No. 5550.

Complete.

Beginning :

इह कर्मज्ञानादिभिरनुकंपासंपादनेन कंसारेस्संसारतरणाकल्पानल्पाभिरीक्ष्य शरणागतकरुणावशा यतयोऽमितमतयो ऽधुनाधरित्रागतानां पवित्रीकरणाय वसुमतीविरचितावतरणायाः परमपुरुषचरणाभरणायाः निजमज्जनेन सज्जनानां प्राचीनदुरितदूरीकरणधुरंधराया गङ्गायाः कांचन लहरीमन्ते एव स्वान्त स्फुरद्धरिपदानुबन्धामति शुद्धां तन्वाना मन्वानास्तस्याः पठनायः (?) विघटनायाः विना निबन्धं जना नबन्धं व्यजन्तीतिना निबध्नन्ति ॥ जले इत्यादिना

End :

स्वभावमधुरा गङ्गालहरी गुरुभिःकृता ।
तन्माधुरी तट्टीका लिखिता तन्निदेशतः ॥
सरसां लहरीमेतां सेवन्ते येच सज्जनाः ।
तन्मांधुरी (?) न सज्जेयुस्सरसग्राहिणो यतः ॥

*   *   *   *

कृतधर्मदर्नान्नत्वा ज्ञात्वानन्मुग्धतामया ।
तत्कृता लहरीव्याख्या विशिष्टाक्रियते सती ॥

R. No. 5992

Palm leaf. 14 × 2 inches. Foll. 12. Lines 8 on a page. Nandināgarī. Injured.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

(a) नृसिंहस्तुतिः by नारायणपण्डितः

NṚSIṂHASTUTIḤ by Nārāyaṇapaṇḍita, son of Likucatilaka.

Foll. 1a—7b. Extent, 225 Granthas.

Same work as that described under D. No. 10101.

Complete.

(b) विष्णुस्तुतिः

VIṢṆUSTUTIḤ.

Foll. 8a—9a. Extent, 40 Granthas.

Similar to the work described under D. No. 10353.

This is a portion of the Pāñcarātrāgama.

Complete.

Beginning :

उषासि चिन्तये द्विष्णुं भोजने च जनार्दनम् ।
शयने पद्मनाभं च स्त्रीसङ्गे पुरुषोत्तमम् ॥
संग्रामे चक्रपाणिं च प्रवेशे च त्रिविक्रमम् ।
दुःस्वप्ने स्मर गोविन्दं भये च मधुसूदनम् ॥

End :

एवं सर्वपदार्थेषु घटादिषु च वस्तुषु ।
तत्तदाकारसंस्थस्तु तत्तन्नामाभिधो हरिः ।
एवं चिन्त्यस्सदा विष्णु मोक्षकामै र्न संशयः ॥
अज्ञात्वा भगवद्रूपं यः कर्म कुरुते नरः ।
तस्य कर्म वृथा याति गजभुक्तकपित्थवत् ॥

Colophon :

इति पाञ्चरात्रागमस्संपूर्णः

(c) शिवस्तुतिः by नारायणपण्डित

ŚIVASTUTIḤ by Nārāyaṇapaṇḍita.

Foll. 9b—10b. Extent, 35 Granthas.

Similar to the work described under D. No. 11222.

Complete.

Beginning :

स्फुटं स्फटिकसप्रभं स्फुटितनाटकश्रीजटं
शशाङ्कदलशेखरं कपिलफुल्लनेत्रत्रयम् ।
तरक्षुवरकात्तिमद्भुजगभूषणं भूतिमत्
कदा नु शितिकण्ठ ते वपुरवेक्ष्यते वीक्षणम् ॥

End :

सतां श्रवणपद्धतिं (सरतु) स्वदतु सन्नतोऽत्यसौ
शिवस्य करुणाङ्कुरान्प्रति कृता सदा सोदिता ।
इति प्रयतमानसां व्यधित नाम नारायणः
शिवस्तुति मिमां शुभां लिकुचसूरिसूनुः सुधीः ।

Colophon :

॥ नारायणपण्डितार्यविरचिता शिवस्तुति स्संपूर्णा ॥

(*a*) विष्णुपारम्यनिरूपणम्

VIṢṆUPĀRAMYANIRŪPAṆAM.

Foll. 11*a*—12*a*. Foll. 12*b* is left blank. Extent, 35 Granthas.
Similar to the work described under R. No. 3524.
Incomplete.

Beginning :

वायो राज्ञां पुरस्कृत्य मणिभद्रः प्रचोदितः ।
मध्वगेहस्य भार्यायां प्रवेशं कृतवान्प्रभुः ॥
...
नवमासावसाने तु स्वयं गत्वा बलात्मकः ।
बहिर्निष्कासयामास तं जावं तु तदैवहि ।

* * * *

नन्वत्र प्रयोगप्रकारः कथं:— इति चेदुच्यते । ब्रह्ममीमांसा शास्त्रं, विष्णूत्कर्षरूपतत्त्वनिर्णायकं, आनन्दतीर्थवत्त्वात्, भारतवदिति ।

End :

उपदेश्यतया आनन्दतीर्थवत्त्वात्, भारतवदिति निर्णयसाध्यक एव प्रयोगप्रकारः । भारतादौ सपक्षे निर्णयवत्त्वं च जनकतया ...... ध्यवैकरूयम् । अन्यत्स्पष्टम् ।

R. No. 5993

Palm leaf. 13 × 1¼ inches. Foll. 71. Lines, 5 in a page. Nandināgarī. Injured.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

(*a*) पञ्चसूक्तम्

PAÑCASŪKTAM.

Foll. 1*a*—57*a*. Foll. 57*b* is left blank. Extent, 1,200 Granthas.

Contains Viṣṇusūktam, Gharmasūktam, Samudrasūktam, Puruṣasūktam, Manyusūktam.

Same work as that described under D. No. 228.

(*b*) विष्णुसहस्रनामस्तोत्रम्

VIṢṆUSAHASRANĀMASTOTRAM.

Foll. 58*a*—69*b*. Extent, 240 Granthas. Printed.
Same work as that described under D. No. 9008.
Complete.

(*c*) मङ्गलाष्टकम् by वादिराजः

MAṄGALĀṢṬAKAM by Vādirāja.

Foll. 70*a*—71*b*. Extent, 40 Granthas.
Same work as that described under D. No. 10183.
Complete.

R. No. 5994

Palm leaf. 11¾ × 1½ inches. Foll. 30. Lines, 5 in a page. Nandināgarī. Injured
Extent, 450 Granthas.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

तिथ्यादिनिर्णयः

TITHYĀDINIRṆAYAḤ.

Similar to the work described under D. No. 3120.
Incomplete.

Beginning :

श्रावण शुक्लपौर्णमी, उपाकर्मपरदिने पौर्णमी 12 घटिका चेत् परदिने । उपाकर्मप्रतिपाद्दिने द्वादशघटिकायाः परं चेत्पूर्वदिने उपाकर्म । ऋग्वेदिनां श्रवणं श्रवणनक्षत्रे

* * * *

अथ संक्रान्तयो द्वादश । तत्रमेषतुलयोः पूर्वोत्तरभागयोः दश घटिकाः पूर्वकालः ।

* * * *

अथ ग्रहणे पूर्वरात्रौ चन्द्रग्रहणे . . . . अहर्भोजनं नकार्यम्। सार्धप्रहरमध्यमोक्षश्चेत् राहुमुक्तचन्द्रं दृष्ट्वा स्नात्वा ताम्बूलादिकं गृ)ह्णीया)त् प्रथमयामग्रहणे तु अहर्भोजनं कार्यम् ।

* * * *

आर्यमानेन दशमीगणनप्रकारः ।
भोगाद्रेरदरैः हीनो दोषोऽङ्कघ्नः शतान्वितः ।
पलेनापि समायुक्ता तिथिः सा सर्पसंमता ॥
अस्यार्थः नवमीप्रविष्टदशमीघटिकासमुदायः ।

* * * *

अरुणोदयवेलायां दशमी परिदृश्यते इत्यादिना विष्ण्वेकादशी त्याज्येत्युक्तम् ।

End :

द्वादश द्वादशी हन्ति पूर्वेद्युः पारणे कृते ।
एकादश्यां तु विद्धायां परतो द्वादशी यदि ॥

" उपवासद्वयं कार्यं " इत्यादिवचननिचयमनुसृत्य . . . . . .

R. No. 5995

Paper. 12 × 4 inches. Foll. 2. Lines, 6 on a page. Devanāgarī. Injured. Extent, 25 Granthas.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācāryar, Triplicane, Madras.

पञ्चावयववाक्यलक्षणम् ।

PAÑCĀVAYAVAVĀKYALAKṢAṆAM.

This work gives the definitions of the statements of the five syllogisms according to the Nyāya system.

Complete.

Beginning :

तच्चानुमानं परार्थेन्यायः, तदवयवाश्च प्रातिज्ञाहेतूदाहरणोपनयनानि निरूप्यन्ते । तत्रसमस्तरूपोपपन्न + न्यायसाध्यमिति + लिङ्गप्रतिपादकवाक्यं न न्यायः । तत्रैव वाक्येऽतिव्याप्तेः । किन्त्वनुमितिचरमकारणीभूतलिङ्गपरामर्शजनकशाब्दज्ञानजनकवाक्यं न्यायः ॥

End :

अवयवत्वंतु न्यायान्तर्गतत्वेसति प्रतिज्ञाद्यन्यतमत्वं, प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाघटितत्वं वा वक्तव्यम् ।

R. No. **5996**

Palm leaf. 16 × 1 inches. Foll Lines, 7 in a page. Grantha. Injured.

Purchased in 1936-37 from Śrī K. Rangasami Iyengar Al, South Siruvalur, Tindivanam taluk.

(*a*) अम्बास्तवव्याख्या by अर्धनारीश्वरदीक्षितः

AMBĀSTAVAVYĀKHYĀ by Ardhanariśvara Dīkṣita.

Foll. 1*a*—57*b*. Extent, 1325 Granthas.

This work is a commentary, by Ardhanārīśvara Dīkṣita, on the text, similar to that described under D. No. 9570.

Complete.

Beginning :

. . . . पञ्चेषु ब्रह्मविद्यया ।
प्राणच्चरणभषाय परस्मै ब्रह्मणे नमः ॥
घ्राणायुकरबाणानां रसनाजीवन निदानचापल . . ।
. . . . प्राणकलां नौमि पञ्चमकुटस्य ॥
हरिहरयोरवतारावाकलये व्यासशङ्करौ हृदये ।
उदधारि कुमतिशङ्कापङ्कातङ्का जग . . . . ।

कपिलकणादजैमिनिपराशरभूफणिराट्, पदनयनेन्द्रदेशिकजिनादि-मदोद्यतधीः । पशुपतिपाञ्चरात्रगणनाथ कुमारशिवागममहित स्सरत्न-फलकाध्वरिराट् जयति ॥

श्रीश्रीनिवासमखिनस्तस्य पुत्रो महायशाः ।
तस्मादधीत्य शास्त्राणि सर्वाण्येतानि सद्गुरोः ॥
कामाक्षीतनयः श्रीमानर्धनारीश्वरस्सुधीः ।
अम्बास्तवस्य व्याख्यानं कुरुते गुरुसंमतम् ।
स्खलितं मतिदौर्बल्यादस्तिचेदत्रमे क्वचित् ।
समीकुरुत विद्वांसो गुणीकरण . . . ।

(श्री)शङ्कराचार्यकृतौ प्रबन्धौ
सौभाग्यविद्यासुभगोदयाख्यौ ।
पुनः पुनस्साधु विचिन्त्य बुध्या
तदध्वनाहं करवै निबन्धम् ॥

इति खलु कालिदास . . . . महाकविः सर्वमङ्गलाप्रसादलब्ध सर्वविद्याधिपत्यस्तामेव सर्वमङ्गलामेकत्रिंशच्छलोकैरभिष्टौति——यामामनन्तीति ।

End :

तदनेन न्यायेन प्रतिकामं स्तुत्यावृत्तौ गौरवं तर्कयन् सर्वज्ञशिखामणिरसौ सकृदेव सर्वफलसाधकं सर्वेश्वरीसान्निध्यं प्रार्थयमानस्तस्मिंश्च नैरन्तर्यं तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथेति श्रुत्या निरन्तर-ब्रह्मसाक्षात्कारस्याभिहितत्वात् निर्गुणब्रह्माभिन्नस्वात्मप्रत्याभिज्ञानस्य च सगुणब्रह्मसाक्षात्काराधीनत्वात्तमेव साक्षात्कारं निरन्तरं प्रार्थयते ।

Colophon :

इति विश्वामित्रगोत्ररत्नाकरसुधाकरेण श्रीभवस्वामिभाष्यकर्तु भवस्वामि सर्वतोमुखयाजिनः सप्तमेनानवरतान्नदायिनः प्रतिदिनप्रबन्धपरमेश्वरस्य कृष्णसोमपीथिनः षष्ठेनाद्वैतचिन्तामणिकर्तुः कुमारभवस्वामिमहाव्रतयाजिनः पञ्चमेन श्रीकृष्णचरणारविन्दपरिचरषट्चरणायमानान्तःकरणस्य कृष्ण-सोमयज्वनो नप्त्रा वैकुण्ठाणंघण्टामणेः (?) परमभागवतस्य भवस्वामि भट्टस्य पौत्रेण श्रीकेशवपरिचरणचणचरणारविन्दपरिचरणलब्धसर्वविद्याधि-पत्यस्यार्धनारीश्वरवामभागस्तन्यपरिवर्धितस्य मत्तमदावलमस्तकन्यस्तदिवा-प्रदीपघोषणस्य समस्तबिरुदवाग्गनिनदसङ्कुचितरोदःकटाहस्य प्रतिनृपतिसभं पत्रालम्बनकारकस्य प्रतिभटविद्वज्जनविजयतोषितराजन्यपारितोषिकलब्ध चरणकटकठक्काचामरादिबिरुदस्य प्रतिदिनप्रबन्धपरमेश्वरस्य भावनापुरु-षोत्तमाद्यष्टादशरूपककर्तुः शतकन्धरविजयादिषष्टिकाव्यनिर्मातुः साहित्यसंजीविन्याद्यनेकालङ्कारग्रन्थग्रथयितुर्वेदान्तरत्नावलिवादतारावलिमध्वविडम्बन-बौद्धविध्वंसनमणिदर्पणाद्वैतकौस्तुभविधिनिर्णयमर्वमयमर्वस्वमूर्तिरत्नदर्पिषष्टि-भङ्ग्याख्यानधातुपरिशुद्धितत्त्वावबोधाद्यनेकशास्त्रकरणविचक्षणस्य वापीकूप-

तटाकारामाग्रहारप्रतिष्ठापकस्य रत्नखेटाद्वैताचार्यविश्वजिद्याजि श्रीनिवासयज्वनः पुत्रेण पातिव्रत्यादिसच्चरितनिरुद्धप्रसिद्धिकारुन्धत्याः कामाक्ष्या गर्भसंभवेन सर्वविद्याविशारदस्य श्रीकेशवयज्वनोऽनुजन्मना सर्वविद्यासाम्राज्याभिषिक्तस्य श्रीराजचूडामणेरग्रजनुषा पारिजातहरणसत्याप्रीणनसाहित्यसर्वस्वाद्यनेककाव्यनाटकालङ्कारकर्त्रा विवरणसारनिबन्धनाविधात्रा सकलशास्त्रपरिणेनाधेनारीश्वरभट्टेन विरचित समयमतसंजीवनामके अम्बास्तव व्याख्यानग्रन्थः संपूर्णः ।

(*b*) श्रीविद्याटीका

ŚRĪVIDYĀṬĪKĀ.

Foll. 58*a*—85*b*. Extent, 6?5 Granthas.

This is a commentary on the Śrīvidyā, which is supposed to have been taught by Viṣṇu in the form of Hayagrīva. This Vidya is supposed to grant the reader all the four ends in view.

Beginning :

इहखलु भगवान् सर्वविद्यानिधिः बहुविधशाखामयर्ग्यजुस्सामवेदमूर्तिरपरिच्छिन्नचिच्छक्तिकलासमावेशतरङ्गितहृदयो हयग्रीवरुपो महाविष्णुः सकलज्ञानतपोनिधये परसच्चिदानन्दघनचिच्छक्तिरुपं पृष्टवते अगस्त्याय महामुनये अनेकविधशाखामयीनामृग्यजुस्सामशाखानामनेकविधासूपनिषत्सु तत्रतत्रविद्यमानरहस्यार्थावबोधस्य

* * * *

तत्तद्रहस्यार्थतत्त्वप्रकाशिनीं सकलपुरुषार्थसाधनत्वेनाभिमतां सकलपुरुषार्थप्रत्यक्षप्रकाशिनीं श्रीविद्यामुपदिशति । कए इति । कनदीप्तावित्यस्माद्धातोः कन्यते प्रकाश्यतेऽनेन शब्दार्थजालानीति वा कनयतीतिवा ।

End :

इति संपूज्य यथाशक्ति मूलेन संपूज्य नमस्कारान्तं कृत्वा कल्याणवृष्टिस्तवेन देवीं स्मृत्वा यथासुखं विहरेत् ॥ श्रीराजराजेश्वर्यै नमः आवाहिता भव, स्थापिता भव, सन्निहिता भव, संनिरुद्धा भव, सुमुखी भव, अवकुण्ठिता भव, सकली भव, अमृती भव, प्रसीद नमः ॥

(c) श्रीचक्रप्रतिष्ठाविधिः

ŚRĪCAKRAPRATIṢTHĀVIDHIḤ.

Foll. 86a—87b. Extent, 25 Granthas.

This work gives details regarding the consecration of the disc of Viṣṇu.

Complete.

Beginning :

अथैतत्प्रतिष्ठाविधिर्निरूप्यते

प्रकरणोक्ते शुभेदिने कृताह्निकस्साधकोगणपतिमाराध्य ब्राह्मणैः स्वस्ति वाचयित्वाचम्य प्राणानायम्य, देशकालौ सङ्कीर्त्यामुकगोत्रोऽमुकशर्मवर्मादिरहं श्रीललिताश्रीमहात्रिपुरसुन्दरीमाराधयिष्यन् श्रीचक्रराजप्रतिष्ठापनं करिष्य इति सङ्कल्प्य.

End :

चन्द्रचन्दनकस्तूरिकालागरुभिरुच्यते ।
अष्टाङ्गप्रणिपातस्तु वन्दनं कथितं प्रिये ॥
एतच्चराचरं सर्वं क्षेत्रमित्यभिधीयते ।
तत् क्षेत्रं पालितं येन क्षेत्रपालक उच्यते ॥

Colophon :

इति वै कथितं सर्वमूर्ध्वाम्नाय मुदीरितम् ।


(d) ललितास्तवरत्नम्

LALITĀSTAVARATNAM.

Foll. 94a—104b. Extent, 250 Granthas.

Same work as that described under D. No. 10827.

Complete.



MSS — Sanskrit